संस्कृत-वार्ता:

28.04.2024

सायम् - 06:20

<u>मुख्यवार्ता:</u>

· मई-मासस्य सप्तम-दिनाङ्कस्य तृतीयचरणस्य लोकसभानिर्वाचनात् पूर्वं देशे निर्वाचनप्रचारः चरमसीमायां वर्तते ।

· प्रधानमन्त्रिणा अथ भाजपादलस्य वरिष्ठनेत्रा श्रीनरेन्द्रमोदिना उक्तं यत् दश-कोटिभ्यः अधिकाः महिला-स्वसहायतासमूहाः आर्थिकसहायतायाः लाभं प्राप्तवन्तः, इथेनॉलस्य इन्धनेन सह मिश्रणेन कृषकैः सप्ततिसहस्र-कोटिरूप्यकाणि समार्जितानि ।

· भारतीय-निर्वाचन-आयोगेन बहिर्मणिपुर-संसदीयक्षेत्रस्य षट् मतदानकेन्द्रेषु एप्रिल-त्रिंशत् दिनाङ्के प्रातः सप्त-वादनतः सायं चतुर्वादनपर्यन्तं पुनः मतदानं कर्तुं निर्देशः दत्तः।

· त्रयः भारतीय-क्रीडकाः धीरज-बोम्मादेवरः, तरुण् दीपरायः, प्रवीण-जाधवश्च शाङ्घाईनगरे पुरुष-धनुर्बाण-विश्वचषक-स्पर्धायां स्वर्णपदकं विजितवन्तः।

· आई.पि.एल् क्रिकेट् प्रतिस्पर्धा-मालिकायाम् अद्य अहम्मदाबादस्थ- नरेन्द्रमोदी-क्रीडांगणे गुजरात-टाईटान्स् अथ रायल् चालेंजर्स बेंगलूरु दलयोर्मध्ये स्पर्धा प्रचलति ।

<u>निर्वाचनप्रचारः-</u>

**मई-मासस्य सप्तम-**दिनाङ्कस्य तृतीयचरणस्य लोकसभानिर्वाचनात् पूर्वं देशे निर्वाचन**प्रचारः** चरमसीमायां वर्तते । यत्र प्रमुख-राजनैतिकदलानां शीर्षनेतारः देशे सर्वत्र सभाभिः, शोभायात्राभिः च मतदातॄन् आकर्षयितुम् आरम्भं कृतवन्तः। दश-राज्येषु तथा द्वयोः केन्द्रशासितप्रदेशयोः पञ्चनवतिः (९५) संसदीय-आसनानां कृते मई-मासस्य सप्तमे दिनाङ्के मतदानं भविष्यति । अस्मिन् चरणे **एकपञ्चाशदुत्तर-त्रिशताधिक-**एकसहस्रं अभ्यर्थिनः **स्वभाग्यं परिशीलयन्ति** । भाजपादलस्य वरिष्ठनेत्रा अथ प्रधानमन्त्रिणा श्रीनरेन्द्रमोदिना अद्य कर्नाटकस्य बेलागवीनगरे शिरसी नगरे, दावणगेरे नगरे च बृहत् जनसभाः सम्बोधिताः । जनसभायां वदन् प्रधानमन्त्री श्रीनरेन्द्रमोदी सूचितवान् यत् विगतदशवर्षेषु तस्य सर्वकारेण कृषक-उत्पादक-सङ्गठनस्य माध्यमेन लघुकृषकाणां सहायता कृता येन निवेशव्ययस्य **न्यूनता** साधिता तथा सर्वकारेण कृषि-उत्पादानाम् विक्रयणार्थं विपण्यश्च समुद्घाटिताः । दश-कोटिभ्यः अधिकाः महिला-स्वसहायतासमूहाः आर्थिकसहायतायाः लाभं प्राप्तवन्तः, इथेनॉलस्य इन्धनेन सह मिश्रणेन कृषकैः सप्ततिसहस्र-कोटिरूप्यकाणि समार्जितानि । तेनोक्तं यत् तस्य सर्वकारेण पारिता भारतीय-न्याय-संहिता विधिव्यवस्थायाः उत्तमप्रबन्धनं सुनिश्चितं करिष्यति। तेन

आरोपितं यत् कर्णाटकस्य काङ्ग्रेससर्वकारेण, पूर्वभाजपासर्वकारेण प्रधानमन्त्री-कृषिसम्मानयोजनायाः माध्यमेन कृषकाणां कृते दत्तानां चतुस्सहस्र-रुप्यकाणां स्थगनं कृतमस्ति । कर्नाटकराज्ये काङ्ग्रेसपक्षस्य मतकोषस्य, तुष्टीकरणराजनीत्याः च कारणेन कर्नाटके विधि-विधान-व्यवस्था क्षीणतां गच्छति इति नरेन्द्रमोदी आरोपितवान्। तेन हुब्बल्लीनगरे नेहा-हिरेमठस्य हत्यायाः, रामेश्वरम-कैफे इत्यत्र बम्बविस्फोटस्य च विषये अपि उक्तम् ।

## गृहमन्त्री अमित-शाहः

कासगंज-**मण्डले** भाजपा-**दलस्य** वरिष्ठ-नेता एवं गृहमन्त्री अमित-शाहः राजनैतिक-**सभायाः** सम्बोधनं **कृतवान्। अस्मिन् अवसरे श्रीशाहः** अयोध्यायां प्राणप्रतिष्ठा-समारोहे **भागगृहणं न कृतम् इति** विपक्षस्य उपरि **वाक्प्रहारं कृतवान् । अथ सः अवोचत् यत्** घोषणापत्रे कृताः **सर्वाः** प्रतिज्ञाः भाजपा**दलेन पूर्णीकृताः** । बरेली-मण्डलस्य बदायुन एवं आओनला क्षेत्रयोः भाजपादलस्य वरिष्ठ-नेता एवं उत्तरप्रदेशस्य मुख्यमंत्री योगी आदित्यनाथः जनसभाः सम्बोधितवान् । सः पश्चात् एटा-मण्डले एकां सभां सम्बोधयिष्यति। सम्भल-मण्डले समाजवादीदल-प्रत्याशी दलप्रमुखः अखिलेश-यादवः प्रचारं कृतवान् । सः भाजपादलस्य उपरि बहुधा आरोपयन् अवदत् यत् निर्वाचनस्य प्रथम-चरणद्वये उत्तरप्रदेशस्य-जनाः दलाय उपयुक्तम् उत्तरं दत्तवन्तः अथ तस्य गठबन्धनम्, जनसमूहस्य प्रचण्डं समर्थनं च प्राप्नोति । श्री-अखिलेश-यादवः बरेलीमण्डले अपरं राजनैतिकसभां सम्बोधयिष्यति ।

## भारतीयनिर्वाचनआयोगेन

भारतीय-निर्वाचन-आयोगेन बहिर्मणिपुर-संसदीयक्षेत्रस्य षट् मतदानकेन्द्रेषु एप्रिल-त्रिंशत् दिनाङ्के प्रातः सप्त-वादनतः सायं चतुर्वादनपर्यन्तं पुनः मतदानं कर्तुं निर्देशः दत्तः। भारतीय-निर्वाचन-आयोगेन लोकसभानिर्वाचनस्य द्वितीयचरणान्तर्गतम् एप्रिलमासस्य षड्विंशति-दिनाङ्के एतेषु षट् मतदानकेन्द्रेषु कृतं मतदानं शून्यं घोषितम्।

## दिल्ली – कांग्रेस्

दिल्लीकाङ्ग्रेस-**दलस्य** अध्यक्षः अरविन्दसिंह-लवली स्वपदात् त्यागपत्रं दत्तवान् । काङ्ग्रेस-**अध्यक्षाय** मल्लिकार्जुन-खर्गे इत्यस्मै लिखिते पत्रे लवली-महोदयः अवदत् यत् दिल्ली-काङ्ग्रेस-**एककम्,** आम-आदमी-**दलेन** सह गठबन्धनस्य **विरुद्धम्** अस्ति, **यद्दलं** केवलं काङ्ग्रेस-**दलस्य** विरुद्धं मिथ्या-दुष्ट-भ्रष्टाचार-आरोपान् स्थापयित्वा एव निर्मितम् अस्ति **तथापि कांग्रेस्**-दलेन दिल्लीनगरे आम-आदमी-**पार्टीति दलेन** सह मित्रतां कर्तुं निर्णयः कृतः। **श्री**लवली अवदत् यत् दिल्लीकाङ्ग्रेसस्य दलकार्यकर्तारः आप**दलस्य** मिथ्याप्रचारेण असन्तुष्टाः सन्ति। सः अवदत् यत् दिल्लीनगरे आम आदमी **दलस्य** शासनकाले दिल्लीनगरस्य पूर्वमुख्य**मन्त्रिणः** शीलादीक्षितस्य सर्वकारे कृतस्य विकासकार्यस्य तु**लनायां** सार्वजनिक-मूलसंरचना भृशं दुर्गतां **गता** ।

## IMD-भारतऋतुविज्ञानविभागः – उष्ण-वायुः

भारतऋतुविज्ञानविभागेन पश्चिमबङ्गे-गङ्गातटीय-ओडिशायां च तीव्र-उष्णतायाः स्थितेः रक्त-वार्णिकी सञ्चेतना प्रसारिता । बिहारे, झारखण्डे, रायलसीमायां, कर्नाटके, तमिलनाडु-राज्ये, केरले, माहे इत्यत्र, कोंकणे, उत्तरप्रदेशे, तटीय आन्ध्रप्रदेशे, यानम इत्यादिषु पृथक् पृथक् क्षेत्रेषु उष्णतायाः स्थितिः आगामिषु चतुःपञ्चदिनानि यावत् भवितुं शक्नोति। आईएमडी इति भारतऋतुविज्ञानविभागेन उक्तं यत् श्वः यावत् पश्चिमासम-मेघालय-त्रिपुरा-राज्येषु उष्ण-आर्द्र-स्थितेः अत्यन्तं सम्भावना विद्यते, केरल-माहे-तटीय-कर्नाटक-तटीय-आन्ध्र-प्रदेश-यानम-कोङ्कण-क्षेत्रेषु च मई-मासस्य प्रथमदिनांकं यावत् एतादृशी उष्णतायाः स्थितिः भवितुं शक्नोति । तत्रैव ऋतु-विभागेन श्वः हिमाचलप्रदेशे, उत्तराखण्डे, जम्मू-कश्मीरे-गिल्गितट्-बाल्टिस्ताने-मुजफ्फरबादे च वृष्टेः-हिमपातस्य च पूर्वानुमानं कृतम् अस्ति। पूर्वोत्तरभारते आगामि द्वित्रिदिनानि यावत् वज्रपातस्य, विद्युद्द्योतनस्य च पूर्वानुमानं कृतम् अस्ति । अद्य दिल्ल्याम् आकाशः आंशिकरूपेण मेघाच्छादितः भविष्यति । अधिकात् न्यूनं पर्यन्तं तापमानं नवत्रिंशत्-द्वाविंशति डिग्री सेल्सियसपर्यन्तं भवितुं शक्नोति ।

## खनिजशिखरसम्मेलनम्

खाननमन्त्रालयः श्वः नवदिल्ल्यां लाभप्रदतां प्र-संस्करण-क्षमतां च संवर्धनाय विशिष्ट-खनिज-शिखर-सम्मेलनस्य आयोजनं करिष्यति। द्विदिवसीयात्मकमिदं शिखरसम्मेलनं विशिष्ट-खनिजानां लाभस्य प्रसंस्करणस्य च क्षेत्रे सहयोगं संवर्धनाय, ज्ञानस्य आदान-प्रदानाय, नवाचारं च संवर्धनाय विनिर्मितः एकः महत्त्वपूर्णः कार्यक्रमः अस्ति। मन्त्रालयेन उक्तं यत्, इदं शिखरसम्मेलनं भारतस्य तीव्र-आर्थिक-वृद्धेः महत्त्वाकांक्षिणः स्वच्छ-ऊर्जा-लक्ष्यस्य च पृष्ठभूम्याधारितं भविष्यति। शिखरसम्मेलने शीर्षोद्योगिनः, स्टार्टअप-संस्थाः, सर्वकारस्य-अधिकारिणः, वैज्ञानिकाः, शिक्षाविदः, नीतिविशेषज्ञाः च समाविष्टाः भाविष्यन्ति।

## धनुर्बाण-चषकस्पर्धा

भारतीयदलेन, शाङ्घाईनगरे अद्यावधि धनुर्बाण-विश्वचषक-स्पर्धायां पञ्च-स्वर्ण-पदकैः, द्वाभ्यां रजतपदकाभ्याम्, एकेन कांस्यपदकेन सह अष्टपदकानि प्राप्तानि । धीरज-बोम्मादेवरः, तरुण् दीपरायः, प्रवीण-जाधवः च इति त्रयः भारतीय-क्रीडकाः पुरुषदलस्पर्धायां दक्षिणकोरियायाः ओलम्पिकविजेतॄन् पराजय्य पञ्चमं स्वर्णपदकं प्राप्तवन्तः। एतेन भारतस्य आगामि-पेरिस्-ओलम्पिक-क्रीडायां प्रवेशस्य सम्भावना वर्धिता ।

## आई.पी.एल् क्रिकेट्

आई.पि.एल् क्रिकेट् प्रतिस्पर्धा-मालिकायाम् अद्य अहम्मदाबादस्थ-नरेन्द्रमोदी-क्रीडांगणे गुजरात-टाईटान्स् अथ रायल् चालेंजर्स बेंगलूरु दलयोर्मध्ये स्पर्धा प्रचलति। गुजरात-टाईटान्स् दलेन, रायल् चालेंजर्स बेंगलूरु **दलाय, एकोत्तर-द्विशतं धावनांकानां लक्ष्यं दत्तम्** । **पूर्वं** रायल् चालेंजर्स बेंगलूरु **दलेन पणकं विजित्य क्षेत्ररक्षणं चितम् आसीत्** । रायल् चालेंजर्स बेंगलूरु **दलेन अद्यावधि नवस्पर्धासु स्पर्धाद्वयं विजित्य तालिकायाम् अन्तिम-स्थानं प्राप्तमस्ति । अन्यत्र अद्य सायं सार्धसप्तवादने चेन्नई-स्थ** एम्.ए. चिदम्बरम् क्रीडांगणे चेन्नई सूपर् किंग्स् अथ सन्-राईसस् हैदराबाद दलयोः मध्ये क्रिकेट्-क्रीडा-प्रतिद्वन्द्वं भविष्यति।

।। इति वार्ता: ।।